Roll No. ..................................
Signature of Invigilator ………………………

**Paper Code**
**BD-503**

# पतंजलि विश्वविद्यालय

# University of Patanjali

**Examination December – 2018**

**B.A. Philosophy (Semester: Fifth)**

**संस्कृत**

**संस्कृत–व्याकरणम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. मुद्राराक्षसस्य तृतीयाङ्कस्य सारो लेख्यः।
2. शुकनासोपदेशानुसारं लक्ष्म्याः प्रभावं वर्णयत।
3. 'पर्यावरणसंरक्षणम्' इति विषयमधिकृत्य निबन्धो लेखनीयः।
4. "डुदाञ् दाने" इत्यस्माद् धातोर्दशसु लकारेषु रूपाणि लेखनीयानि।
5. अधोलिखितानां धातूनां प्रत्ययान्तरूपाणि लिखन्तु –
   धातवः – पच्, ब्रू, हन्
   प्रत्ययाः – क्त, शतृ तव्यत् सन्, कर्मवाच्ये (प्रथमपुरुषे एकवचने)

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. अधोलिखितगद्यस्य सप्रसङ्गा व्याख्या कार्या –
   गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्।
   अनुपजातपलितादिवैरूप्यजरम्।
2. अधोलिखितश्लोकस्य सप्रसङ्गोऽर्थो लेख्यः।
   स दोषः सचिवस्यैव यदसत् कुरुते नृपः।
   याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम्॥
3. शुकनासोपदेशानुसारं जनानां यौवने उपदेशानां प्रभावः कीदृक् भवति? संक्षेपेण लिखत।
4. 'घ्रा' धातोरेकैकं रूपं लेखनीयम् – (शतृ, क्त्वा, तृच्, सन्, क्त)।
5. शुभपाणिग्रहणसंस्कारविषये निमन्त्रणपत्रं लेखनीयम्।
6. "आचारः परमो धर्मः" इत्यस्मिन् विषये निबन्धो लेखनीयः।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

**1.** सामान्यतया पत्राणां कति श्रेण्यः सन्ति?
(अ) एका (ब) द्वे
(स) तिस्रः (द) चतस्रः

**2.** निबन्धस्य प्रधानतया कति भेदाः सन्ति?
(अ) एकः (ब) द्वौ
(स) त्रयः (द) चत्वारः

**3.** "अद्" धातोः क्तान्तरूपम् अस्ति ..............
(अ) अदन् (ब) अत्तुम
(स) जग्धः (द) अत्ता

**4.** "अस्" धातोः शतृप्रत्ययान्तरूपम् अस्ति ..........
(अ) बुभूषति (ब) सम्भूय
(स) सन् (द) भूतः

**5.** "श्रु" धातोः लङ्लकारे प्रथमपुरुषस्यैकवचनमस्ति ...........
(अ) शृणु (ब) शृणुयात
(स) अशृणोत् (द) अश्रोष्यत

**6.** कादम्बरी अस्ति .....................................
(अ) कथा (ब) आख्यायिका
(स) चूर्णकम् (द) उत्कलिकाप्रायः

**7.** बाणभट्टस्य पितुः नाम ........................
(अ) अर्थपतिः (ब) गजपतिः
(स) गणपतिः (द) चित्रभानुः

**8.** मुद्राराक्षसस्य तृतीयाङ्के कति श्लोकाः?
(अ) 33 (ब) 35
(स) 36 (द) 38

**9.** चण्डीशतकस्य रचनाकारः कः ?
(अ) बाणभट्टः (ब) गोपालभट्टः
(स) भट्टलोल्लटः (द) भट्टनायकः

**10.** कादम्बरीशब्दस्य अर्थः .................
(अ) सुरा (ब) मोदकम्
(स) यतकम् (द) वेल्लनम्

---------------x---------------